वातूलः, पुं, ( वातानां समूहः । "वातादूलः ।" ४।२।४२ । इत्यस्य वार्त्तिकोक्त्या ऊलः । यद्वा, वाताः सन्त्यस्मिन्निति । वात+"सिध्मादिभ्यश्च ।"५ । २ । ९७ । इति लच् । "वातदन्तबलेति ।" ऊङ् । यद्वा, वातानां समूहः शीतं न सहते इति वा । वात+"वातात् समूहे च । वातं न सहते इति च ।" ५।२।१२२ । इत्यस्य वार्त्ति० ऊलच् ।) वात्या । वातासहे,त्रि । इत्यमरः ॥ "वात्या वातसमूहः । अत्र जनखलादिगोरथवातादिति ऊलः । वातासहो वातप्रकृतिरित्यासहः । वाउया इति ख्यातः । अत्र गोविकारादिना ऊलः वातूलः । वातैर्नाम्नीति तुले ह्रस्वोकारवानपि वातुलः । वातूलो वातुलोऽपि स्यादिति द्विरूपकोषः ॥ उन्मत्तेऽपि वातूलः ।" इत्यमरटीकायां भरतः ॥

वातोमा, स्त्री, (वातमूनयतीति । ऊन+अण् ।) गोजिह्वाक्षुपः । इति राजनिर्घण्टः ॥ वायुहीने, त्रि ॥

वात्या, स्त्री, ( वातानां समूहः । वात+"पाशादिभ्यो यः ।" ४ । २ । ४९ । इति यः । ) वातसमूहः । यथा,—

"आवर्त्तिनी च वाताली स्यात् वात्या वातमण्डली ॥"

इति त्रिकाण्डशेषः ॥

( यथा, भागवते । ३ । १७ । ५ ।

"ववौ वायुः सुदुःस्पर्शः फेत्कारानीरयन् मुहुः ।
उन्मूलयन्नगपतीन् वात्यानीको रजोध्वजः ॥")

वात्सकं, क्ली, (वत्सानां समूहः । वत्स+"गोत्रोक्षोष्ट्रेति ।" ४ । २ । ३९ । इति वुञ् ।) वत्ससमूहः । इत्यमरः ॥ ( वत्सकस्येदमिति । वत्सक+अण् । कुटजसम्बन्धिनि इन्द्रयवसम्बन्धिनि च त्रि । यथा, सुश्रुते । ६ । ४० ।

"नागरातिविषामुस्तं पिप्पल्यो वात्सकं फलम् ॥")

वात्सल्यः, पुं, ( वत्सल एव । स्वार्थे ष्यञ् । ) रसविशेषः । यथा,—

"वात्सल्यशान्तौ तु रसौ शृङ्गारः कौशिकः स्मृतः ।"

इति त्रिकाण्डशेषः ॥

एतद्रसाधिकारी यथा,—

"शान्ते ब्राह्मण एव स्यात् प्रीते दासः प्रकीर्त्तितः ।
प्रेयसि स्युः सखायो हि यशोदा वत्सले स्मृता ॥
मधुरे राधिका श्रेया हास्ये स्यान्मधुमङ्गलः ।
सखीयूथोऽद्भुते ज्ञेयो वीरे चारणगोष्ठपाः ॥
करुणे वत्सपादिर्जटिलाद्यास्तु रौद्रके ।
गोवर्द्धनेऽभिमन्युश्च भयानक उदाहृतौ ॥
तपस्विन्यादयो ह्यत्र वीभत्से परिकीर्त्तिताः ।
व्रजस्था नियता ज्ञेया आलम्बनविभावकाः ॥"

इत्युज्ज्वलनीलमणिः ॥

( वत्सलस्य भावः । वत्सल+ष्यञ् । ) वत्सलस्य भावे, क्ली ॥ (स्नेहः । यथा, भागवते ।४।९।३४।

"चरन्तं विश्वसुहृदं वात्सल्याल्लोकमङ्गलम् ॥")

वात्सीपुत्त्रः, पुं, नापितः । इति त्रिकाण्डशेषः ॥

वात्स्यः, पुं, ( वत्सस्य गोत्रापत्यम् । वत्स+"गर्गादिभ्यो यञ् ।" ४ । १ । १०५ । इति यञ् । ) मुनिविशेषः । यथा । वात्स्यसावर्णिगोत्रयोरौर्व्वच्यवनभार्गवजामदग्न्याप्नुवत्प्रवराः । इत्युद्वाहतत्त्वम् ॥

वात्स्यायनः, पुं, ( वत्सस्य गोत्रापत्यं युवा । वत्स+यञ् । ततो यूनि फक् । ) मुनिविशेषः । तत्पर्य्यायः । मल्लनागः २ पक्षिलः ३ स्वामी ४ । इति त्रिकाण्डशेषः ॥ (अयं हि कामसूत्रकर्त्ता । यथा, कुट्टनीमते । ७७ ।

"वात्स्यायनमयमबुधं
वाभ्राव्यदूरेण दत्तकाचार्य्यान् ।
गणयति मन्मथतन्त्रे
पशुतुल्यं राजपुत्त्रश्च ॥")

वादः, पुं, ( वद्+घञ् । ) यथार्थबोधेच्छोर्वाक्यम् । यथा,—

"विजिगीषोः कथा जल्पो वादस्तत्त्वविवेदिषोः ।"

इति जटाधरः ॥

अस्य लक्षणं यथा । प्रमाणतर्कसाधनोपालम्भः सिद्धान्ताविरुद्धः पञ्चावयवोपपन्नः पक्षप्रतिपक्षपरिग्रहो वादः । इति गौतमसूत्रम् ॥ * ॥ अपि च ।

"सर्गाणामादिरन्तश्च मध्यञ्चैवाहमर्ज्जुन ! ।
अध्यात्मविद्या विद्यानां वादः प्रवदतामहम् ॥"

इति भगवद्गीतायाम् १० अध्यायः ॥

"प्रवदतां वादिनां सम्बन्धिनो वादजल्पवितण्डाख्यास्त्रिसः कथाः प्रसिद्धास्तासां मध्ये वादोऽहम् । यत्र द्वाभ्यामपि प्रमाणतर्कैस्तत्त्व स्वपक्षः स्थाप्यते परपक्षश्छलजातिनिग्रहस्थानैर्दूष्यते स जल्पो नाम । यत्र त्वेकः स्वपक्षं स्थापयति अन्यस्तु छलजातिनिग्रहस्थानैस्तत् पक्षं दूषयति न तु स्वपक्षं स्थापयति सा वितण्डा नाम कथा । तत्र जल्पवितण्डे विजिगीषमाणयोर्वादिनोः शक्तिपरीक्षामात्रफले । वादस्तु वीतरागयोः शिष्याचार्य्ययोरन्ययोर्वा तत्त्वनिरूपणफलः । अतोऽसौ श्रेष्ठत्वान्मद्विभूतिरित्यर्थः ।"इति तट्टीकायां श्रीधरस्वामी ॥ ("तत्र वादः । वादो नाम यः परस्परेण सह शास्त्रपूर्ब्बकं विगृह्य कथयति । स वादो द्विविधः संग्रहेण जल्पो वितण्डा च । तत्र पक्षाश्रितयोर्वचनं जल्पः । जल्पविपर्य्ययो वितण्डा ।" इति चरके विमानस्थानेऽष्टमेऽध्याये ॥ )

वादकः, त्रि, ( वादयतीति वद्+णिच्+ण्वुल् । ) वाद्यकरः । (यथा, भागवते । १० । १८ । ११ ।

"क्वचित् नृत्यत्सु चान्येषु गायकौ वादकौ स्वयम् ।
प्रशंसतुर्म्महाराज साधु साध्विति वादिनौ ॥")

वक्ता । वदधातोः कर्त्तरि णक(ण्वुल्)प्रत्ययेन निष्पन्नः ॥

वादनं, क्ली, ( वद्+णिच्+ल्युट् । ) वाद्यम् । ( यथा, संगीतदर्पणे । ११ ।

"वीणावादनतत्त्वज्ञः श्रुतिजातिविशारदः ।
तालज्ञश्चाप्रयासेन मोक्षमार्गं नियच्छति ॥")

वा(बा)दरं, त्रि, ( बदरात् बदराकारकार्पासफलाद्भवम् । बदर+अण् । ) कार्पासनिर्म्मितवस्त्रादि । इत्यमरः । २।६।१११ ॥ बादरायाः कार्पास्या जातं इत्यर्थे अण्प्रत्ययेन निष्पन्नम् ॥

वा(बा)दरः, पुं, ( बदर+स्वार्थे अण् ।) कार्पासवृक्षः । इति हेमचन्द्रः ॥ (बदरीवृक्षः । कुलगाछ इति भाषा ॥ )

वादरङ्गः, पुं, अश्वत्थवृक्षः । इति त्रिकाण्डशेषः ॥

वा(बा)दरा,स्त्री, (बदरवत् फलमस्त्यस्याः । बदर+अच् । ततः टाप् ।) कार्पासवृक्षः । तत्पर्य्यायः । कार्पासी २ तुण्डपुष्पा ३ बदरी ४ समुद्रान्ता ५ तुण्डिकेरी ६ कार्पासिका ७ । इति शब्दरत्नावली ॥ अस्याः पर्य्यायान्तरं गुणाश्च कार्पासीशब्दे द्रष्टव्याः ॥

वादरायणः, पुं, ( बदरायणे बदरिकाश्रमे निवसतीति । बदरायण+अण् । ) व्यासदेवः । इति शब्दरत्नावली ॥

वादरायणिः, पुं, ( बादरायण एव । स्वार्थे इञ् ।) व्यासदेवः । इति शब्दरत्नावली ॥ ( बादरायणस्यापत्यमिति अपत्यार्थे इञ् । शुकदेवः ॥)

वादरिकः, त्रि, बदरचयनकर्त्ता । बदरं चिनोतीत्यर्थे ष्णिकप्रत्ययेन निष्पन्नः ॥

वादलं, क्ली, मधुयष्टिका । इति शब्दचन्द्रिका ॥

वादवादी [न्], पुं, ( वादं वदतीति । वद्+णिनिः ।) जिनभेदः । तत्पर्य्यायः । आर्हतः २ । इति हेमचन्द्रः ॥

वादामं, क्ली, स्वनामख्यातफलम् । तस्य गुणाः । उष्णत्वम् । सुस्निग्धत्वम् । वातघ्नत्वम् । वलशुक्रकारित्वञ्च । इति राजवल्लभः ॥

वादान्यः, त्रि, ( वदान्य एव । स्वार्थे अण् । ) वदान्यः । बहुप्रदः । इति भरतद्विरूपकोषः ॥

वादालः, पुं, मत्स्यभेदः । बोयालि इति भाषा । तत्पर्य्यायः । सहस्रदंष्ट्रः २ । इति हेमचन्द्रः ॥

वादिः, त्रि, (वादयति यत्नमुच्चारयतीति । वद्+णिच्+"वसिवपियजीति ।"उणा० ४ । १२४ । इति इञ् । ) विद्वान् । इत्युणादिकोषः ॥

वादित्रं, क्ली, ( वाद्यते । वद्+णिच्+"भूवादिगृभ्यो णित्रन् ।" उणा० ४ । १७० । इति णित्रन् । ) वाद्यम् । इत्यमरः ॥ ( यथा, भागवते । ३ । २४ । ७ ।

"अवादयंस्तदा व्योम्नि वादित्राणि घनाघनाः ॥"

वादित्रेऽर्थिनं गायति इति । गै+कः । अर्थिरचके, त्रि । यथा, वक्रोक्तिपञ्चाशिकायाम् ।२६।

"ज्ञात्वा त्वां पशुवर्ज्जितं नहि मया दूतेन न प्रीयते
नैवाहं पशवः कृशोदरि चितः शक्तो विधातुं त्वया ।
किं वादित्रविवर्ज्जयाच दयिते को वादित्रगायते
त्वत्ता निर्जितशैलराजसुत इत्थं व्याजगधूर्ज्जटिः ॥")